2026

MAVYE404

शोधप्रविधिः लघुशोधप्रबन्धश्च

चतुर्थपत्रम्

पूर्णाङ्काः – 40

समयः – घण्टाद्वयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् - 1×6=6

1. अनुसन्धानम् इत्यत्र को धातुः?
2. अन्वेषणम् इत्यत्र को धातुः?
3. व्याख्यात्मकमनुसन्धानं किम्?
4. तुलनात्मकमध्ययनमाधारीकृत्य सर्वादौ शोधप्रबन्धः कदा उपस्थापितः?
5. शास्त्रीयशोधपद्धतिः का?
6. श्रीजगन्नाथज्योतिः इति संस्कृतशोधपत्रिका कुतः प्रकाश्यते ?

अधस्तनेषु प्रश्नेषु चत्वारः समाधेयाः - 6×4=24

7. अनुसन्धानं किम् ? इति निरूपयत।
8. उपयोगितासिद्धान्तस्य निरूपणं कुरुत।
9. पादटीका इत्यस्य विश्लेषणं कुरुत।
10. भावानुवादस्य तात्पर्यं निरूपयत।
11. शीर्षकपृष्ठं किम् ? व्याख्यायत।
12. परिशिष्टभागस्य तात्पर्यं व्याख्यायत।

अधोलिखितेषु प्रश्नेषु एकं समाधेयम् - 10×1=10

13. शोधविषयनिर्वाचनस्य सिद्धान्तानां निरूपणं कुरुत।
14. भाषान्तरीकरणं किम् ? व्याख्यायत।
15. सहायकग्रन्थसूचीनिर्माणे कः प्रविधिः ? व्याख्यायत।

****